# EkakShara

# એકાક્ષરોપનિષત્

## Document Information

Text title : Ekakshara Upanishad

File name : ekakshara.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 69 / 108; Krishna Yajurveda - Samanya upanishad

Latest update : Mar. 23, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# એકાક્ષરોપનિષત્

એકાક્ષરપદારૂઢં સર્વાત્મકમખણ્ડિતમ્ ।
સર્વવર્જિતચિન્માત્રં ત્રિપાન્નારાયણં ભજે ॥

ॐ સહ નાવવતુ સહ નૌ ભુનક્તુ ।
સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ॐ
એકાક્ષરં ત્વક્ષરેઽત્રાસ્તિ સોમે
    સુષુમ્નાયાં ચેહ દૃઢી સ એકઃ ।
ત્વં વિશ્વભૂર્ભૂતપતિઃ પુરાણઃ
    પર્જન્ય એકો ભુવનસ્ય ગોપ્તા ॥ ૧॥

વિશ્વે નિમગ્નપદવીઃ કવીનાં
    ત્વં જાતવેદો ભુવનસ્ય નાથઃ ।
અજાતમગ્રે સ હિરણ્યરેતા
    યજ્ઞૈસ્ત્વમેવૈકવિભુઃ પુરાણઃ ॥ ૨॥

પ્રાણઃ પ્રસૂતિર્ભુવનસ્ય યોનિ-
    ર્વ્યાપ્તં ત્વયા એકપદેન વિશ્વમ્ ।
ત્વં વિશ્વભૂર્યોનિપારઃ સ્વગર્ભે
    કુમાર એકો વિશિખઃ સુધન્વા ॥ ૩॥

વિતત્ય બાણં તરુણાર્કવર્ણં
    વ્યોમાન્તરે ભાસિ હિરણ્યગર્ભઃ ।
ભાસા ત્વયા વ્યોમ્નિ કૃતઃ સુતાર્ક્ષ્ય-
    સ્તવં વૈ કુમારસ્ત્વમરિષ્ટનેમિઃ ॥ ૪॥

ત્વં વજ્રભૃદ્ભૂતપતિસ્ત્વમેવ ।
  કામઃ પ્રજાનાં નિહિતોઽસિ સોમે ।
સ્વાહા સ્વધા યચ્ચ વષટ્ કરોતિ
  રુદ્રઃ પશૂનાં ગુહયા નિમગ્નઃ ॥ ૫॥

ધાતા વિધાતા પવનઃ સુપર્ણો
  વિષ્ણુર્વરાહો રજની રહશ્ચ ।
ભૂતં ભવિષ્યત્પ્રભવઃ ક્રિયાશ્ચ ।
  કાલઃ ક્રમસ્ત્વં પરમાક્ષરં ચ ॥ ૬॥

ઋચો યજૂંશિ પ્રસવન્તિ વક્ત્રા-
  ત્સામાનિ સમ્રાડ્વસુવન્તરિક્ષમ્ ।
ત્વં યજ્ઞનેતા હુતભુગ્વિભુશ્ચ
  રુદ્રાસ્તથ દૈત્યગણા વસુશ્ચ ॥ ૭॥

સ એષ દેવોઽમ્બરગશ્ચ ચક્રે
  અન્યેઽભ્યધિષ્ઠેત તમો નિરુન્ધ્યઃ ।
હિરણ્મયં યસ્ય વિભાતિ સર્વં
  વ્યોમાન્તરે રશ્મિમિવાંશુનાભિઃ ॥ ૮॥

સ સર્વવેત્તા ભુવનસ્ય ગોપ્તા
  તાભિઃ પ્રજાનાં નિહિતા જનાનામ્ ।
પ્રોતા ત્વમોતા વિચિતિઃ ક્રમાણાં
  પ્રજાપતિશ્છન્દમયો વિગર્ભઃ ॥ ૯॥

સામૈશ્ચિદન્તો વિરજશ્ચ બાહૂં
  હિરણ્મયં વેદવિદાં વરિષ્ઠમ્ ।
યમધ્વરે બ્રહ્મવિદઃ સ્તુવન્તિ
  સામૈર્યજુર્ભિઃ ક્રતુભિસ્ત્વમેવ ॥ ૧૦॥

ત્વં સ્ત્રી પુમાંસ્ત્વં ચ કુમાર એક-
  સ્ત્વં વૈ કુમારી હ્યથ ભૂસ્ત્વમેવ ।
ત્વમેવ ધાતા વરુણશ્ચ રાજા
  ત્વં વત્સરોઽગ્ન્યર્યમ એવ સર્વમ્ ॥ ૧૧॥

મિત્રઃ સુપર્ણશ્ચન્દ્ર ઇન્દ્રો  રુદ્ર-
  સ્ત્વષ્ટા વિષ્ણુઃ સવિતા ગોપતિસ્ત્વમ્ ।

ત્વં વિષ્ણુર્ભૂતાનિ તુ ત્રાસિ દૈત્યાં-
    સ્ત્વયાવૃતં જગદુદ્ભવગર્ભઃ ॥ ૧૨॥

ત્વં ભૂર્ભુવઃ સ્વસ્ત્વં હિ
    સ્વયંભૂરથ વિશ્વતોમુખઃ ।
ય એવં નિત્યં વેદયતે ગુહાશયં
    પ્રભું પુરાણં સર્વભૂતં હિરણ્મયમ્ ॥ ૧૩॥

હિરણ્મયં બુદ્ધિમતાં પરાં ગતિં
    સ બુદ્ધિમાન્બુદ્ધિમતીત્ય તિષ્ઠતીત્યુપનિષત્ ॥

ૐ સહ નાવવતુ સહ નૌ ભુનક્તુ ।
સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યેકાક્ષરોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*EkakShara*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*